केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीराजीवगान्धीपरिसरः
शृङ्गेरी - ५७७१३९


## वेदाङ्ग-वेदभाष्यविद्याशाखायाः

# कार्यशालाप्रतिवेदनम् ।

# कार्यशालासमितिः ।



**प्रो.हंसधर झाः**
मार्गदर्शकः



**प्रो.सूर्यनारायणभट्टः**
संयोजकः



**डा.दुर्गाशरणरथः**
सहसंयोजकः



**श्री आदर्शविनायकभट्टः**
सहसंयोजकः

# कार्यशालाप्रतिवेदनम् ।

केन्द्रीयसंस्कृतविश्वविद्यालयान्तर्गतस्य श्रीराजीवगान्धीपरिसरस्य आदेशानुसारं (14-09-2023 दिनाङ्कः, पत्रसं - CSU/Res-Pub/104-08/2023-24/684) अस्माकं परिसरे बोधायन-आपस्तम्बसूत्रानुसारम् आधान-अग्निहोत्रविषयिणी सप्तदिनव्यापिनी राष्ट्रियकार्यशाला समायोजनीया इति सूचना प्राप्ता । तदनु ०४-११-२०२३ तः १०-११-२०२३ पर्यन्तं वेदाङ्ग-वेदभाष्यविद्याशाखापरतया श्रौतकर्मणां विषये छात्राणां सुबोधाय नानाश्रौतसूत्रानुगुणम् आधान-अग्निहोत्रविषयिणी सप्तदिनव्यापिनी राष्ट्रियकार्यशाला समायोजिता । तत्र नैकेभ्यः प्रदेशेभ्यः बहुशाखीयाः अग्निहोत्रिणः, प्रयोगविपश्चिदश्च ससूत्रव्याख्यानाय सम्प्रार्थिताः । ते च परिसरे समवेताः कार्यशालाविषयानुरोधेन नानाशाखाभेदेन प्रयोगभेदपुरस्सरं नैकान् विषयान् प्रत्यपत्सत । एतादृशस्य अपूर्वस्य कार्यक्रमस्य प्रतिवेदनम् इह प्रदीयते ।



# कार्यशालाविषयः प्रचारश्च ।

केन्द्रीयसंस्कृतविश्वविद्यालयान्तर्गते श्रीराजीवगान्धीपरिसरे वेदाङ्ग-वेदभाष्यविद्याशाखापक्षतः सप्तदिनव्यापिनी कार्यशाला समायोजिता । तत्र प्राधान्येन पाठ्यबिन्दुः आधानम् अग्निहोत्रञ्च इति । स च बोधायन-आपस्तम्ब-कात्यायनादि-श्रौतसूत्रानुसारम् इति कार्यशालासमितिः पर्यकल्पयत् । तत्र अवान्तररूपेण तत्तच्छाकीयान् प्रयोगग्रन्थान् कल्पसूत्राणि च प्रत्यपाठयन् । कार्यशालायां भागग्रहणाय प्रपूरणपत्रं सविवरणात्मकं च निर्माय अन्तर्जालपटले प्रपञ्चितम् । तेन कार्यशालायां भागग्राहिणः अधिकसङ्ख्याकाः सम्पादिताः ।

प्रपञ्चितपत्रचित्रम्



# उद्घाटनसत्रम् ।



श्रीराजीवगान्धीपरिसरस्य सङ्गोष्ठीप्रकोष्ठे वास्तुज्योतिषविद्याशाखायाः वेदाङ्ग-वेदभाष्यविद्याशाखायाश्च सप्तदिनव्यापिन्याः कार्यशालायाः उद्घाटनसत्रं शोभकृदाश्विनकृष्णसप्तम्यां (०४-११-२०२३) तमे दिने प्रातः १०.०० वादनसमये तन्त्रोणैव समजनि । तत्र उभयोः कार्यशालयोः उद्घाटनार्थं विपश्चिदः समामन्त्रिताः । तत्र वास्तुशास्त्रज्ञः आचार्यः डि शिवप्रसादतन्त्रिवर्यः, कालज्ञः कुलपतिचरः प्रो.ए.पि.सच्चिदानन्द उडुपवर्यः, वेदब्रह्मा नागेन्द्र अनन्तभट्टवर्यः , वेदभाष्यज्ञः मीमांसाशास्त्रकोविद् आचार्यः वीरनारायणपाण्डुरङ्गिमहोदयश्च समुपस्थाय दीपप्रज्वलनपुरस्सरं कार्यशालायाः उद्घाटनञ्च विदधुः । तत्रैव आचार्यः डि शिवप्रसादतन्त्रिवर्यः वास्तुशास्त्रे देवालयविचारं प्रास्तावीत्, प्रकृतकाले ज्यौतिषस्य वास्तुशास्त्रस्य च उपयोगविषये नागेन्द्र अनन्तभट्टवर्यः, कार्यशालाविषये प्रो.ए.पि.सच्चिदानन्द उडुपवर्यः, श्रौतकर्मणां च विषये देवतामन्त्रादिविषये च




आचार्यः वीरनारायण-पाण्डुरङ्गिमहोदयश्च समुपस्थितान् सर्वान् उद्बोध्य द्वयोः कार्यशालायोः निर्विघ्नपरिसमाप्तिद्वारा सफलताम् अनुग्रहीषुः ।

# कार्यशालासत्राणि ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशानुसारं यथा विद्यालये कक्ष्याबाधो न स्यात् तथा कार्यशालासमायोजनं कर्तव्यमिति कार्यशालासमितिः शनिभानुवासरयोः सार्धहोरात्मकं सत्रचतुष्टयं, सोमवासरादारभ्य भार्गववासरपर्यन्तं यावत् केवलम् आपराह्णिकं सत्रद्वयं प्रतिदिनं पर्यकल्पयत् । तेन अध्ययने अव्यवधानं कार्यशालासम्पत्तिश्च भावयितुं शक्यत इति । एवमेव केवलाध्ययनेन अधीतस्य विषयस्य दृढता न सम्पद्यत इति होराकालात्मकं चिन्तनसत्रमपि प्रत्येकस्मिन् दिने समायोजयत् । तदनु सत्राणि प्रवर्तितानि तत्प्रतिवेदनञ्च इह प्रदीयते ।

## प्रथमसत्रम् ।



(दिनाङ्कः - ०४ - ११ -२०२३) प्रथमे दिने अपराह्णे २.३० वादनतः ४.०० पर्यन्तम् आधानविषयिणी कक्ष्या प्रवर्तिता । तत्र अध्यापकः - प्रो.शत्रुघ्नपाणिग्राहिवर्यः (श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी) online माध्यमेन आधानविषयं प्रपाठीत् ।

## द्वितीयसत्रम् ।



तस्मिन्नेवदिने अग्निहोत्रविषयिणी कक्ष्या  अपराह्णे ४.३० वादनतः ६.०० पर्यन्तम् प्रवर्तिता ।  तत्रापि अध्यापकः प्रो.शत्रुघ्नपाणिग्राहिवर्यः  (online) माध्यमेन अग्निहोत्रषयं कात्यायनश्रौतसूत्रानुसारं प्रपाठीत् । तत्र कार्यक्रममममुं डा.दुर्गाशरणरथवर्यः समचालयत् ।


## तृतीयं चतुर्थं च सत्रम् ।




(दिनाङ्कः - ०५ - ११ -२०२३) द्वितीये दिने  प्रातः १०.०० वादनतः ११.१५ पर्यन्तम् अध्यापकः - डा. निरञ्जनमिश्रवर्यः (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः) शुक्लयजुर्वेदे कात्यायनश्रौतसूत्रानुसारं आधानविषयम् अध्यापयत् ।  ।पुनः प्रातः ११.४५ वादनतः ०१.०० पर्यन्तम् आधानविषयिणीं कक्ष्यां स्वीकृत्य शुक्लयजुर्वेदे कात्यायनश्रौतसूत्रानुसारं आधानविषयं प्रास्तावीत्  । तत्र प्रो.सूर्यनारायणभट्टवर्यः द्वे सत्रे समचालयत् ।

## पञ्चमं षष्ठं च सत्रम्

(दिनाङ्कः - ०५ - ११ -२०२३) द्वितीये दिने अपराह्णे २.३० वादनतः ४.०० पर्यन्तम् अग्निहोत्रविषयिणी कक्ष्या प्राचलत् । तत्र अध्यापकः - डा. हनूमच्छर्मवर्यः online माध्यमेन सर्वान् बोधायनश्रौतसूत्रानुसारम् अग्निहोत्रविषयम् उदबोधयत् । पुनः ४.३० वादनतः ६.०० पर्यन्तम् अवशिष्टान्यपि अग्निहोत्रविषयकसूत्राणि तेनैव महोदयेन अग्रिमसत्रे प्रपाठितानि । तयोः सत्रयोः सञ्चालकः विद्वान् आदर्शविनायकभट्टः ।



## सप्तमं सत्रम्



(दिनाङ्कः- ०६-११-२०२३)तृतीयदिने सोमवासरे कक्ष्यानिर्बाधेन सत्रसञ्चालनाय केवलं माध्याह्निकं सत्रमेव प्रावर्तयत् । तत्र प्रथमे सत्रे २.३० वादनतः ४.०० वादनपर्यन्तं संस्कृतग्राममत्तूरुतः राघवेन्द्रश्रौती समागत्य आपस्तम्बश्रौतसूत्रानुसारम् आधानप्रयोगं पाठितवान् । तथैव तदङ्गभूतं पवमानेष्टिविषयं च प्रास्तावीत् ।

## अष्टमं सत्रम्

तस्मिन्नेवदिने द्वितीयसत्रे ४.३० वादनात् ६.०० वादनपर्यन्तम् डा. निरञ्जनमिश्रमहाभागः पुनः कात्यायनश्रौतसूत्रानुसारं अग्निहोत्रप्रयोगञ्च अपाठयत् । तद्दिने सत्रद्वयमपि विद्वान् आदर्शविनायकभट्टः समचालयत् । सर्वेऽपि छात्राः online तथा प्रत्यक्षरूपेण च समुपस्थाय सत्रस्य साफल्यम् अवाप्नुवन् ।



## नवमं दशमं च सत्रम्






(दिनाङ्कः - ०७ - ११ -२०२३) कुजवासरे अपराह्णे २.३० वादनतः ०४.०० पर्यन्तम् आधानविषयिणी कक्ष्या स्वीकृता । तत्र निरुक्तविशेषज्ञः अध्यापकः - डा. हनूमच्छर्मवर्यः (श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः तिरुपतिः) बोधायन-आपस्तम्बानुसारं प्रथमसत्रे आधानविषयमुपस्थापितवान् । तदनु ४.३० वादनतः ६.०० वादनं यावत् द्वितीयसत्रेऽपि स एव बोधायन-आपस्तम्बानुसारं अग्निहोत्रविषयम् उपस्थाप्य तत्रत्यान् आनुष्ठानिकविषयविशेषान् उद्बोधितवान् । तत्र कार्यक्रमसञ्चालकः - डा. दुर्गाशरणरथवर्यः ।

## एकादशं सत्रम्






(दिनाङ्कः - ०८ - ११ -२०२३) सौम्यवासरे अपराह्णे २.३० वादनतः ०४.०० वादनपर्यन्तम् आधानविषयणी कक्ष्या प्रचालिता । तत्र संस्कृतग्राममत्तूरुतः वेदमूर्तिः केशव अवधानिमहोदयः समामन्त्रितः । स च समागत्य अस्मच्छात्रान् आपस्तम्बश्रोतसूत्रानुसारं तथैव बोधायनश्रोतसूत्रे अनुष्ठानभेदकथनपुरस्सरं च उद्बोध्य समग्रे अग्न्याधानविषये स्थूलप्राक्कल्पनां पर्यकल्पयत् ।

## द्वादशं सत्रम्

(दिनाङ्कः - ०८ - ११ -२०२३) सौम्यवासरे अपराह्ने ४.३० वादनतः ६.०० वादनपर्यन्तम् आधानाङ्गभूता पवमानेष्टिविषयिणी कक्ष्या प्रचालिता । तत्र संस्कृतग्राममत्तूरुतः वेदमूर्तिः वेङ्कटेश अवधानिमहोदयः समामन्त्रितः । स च समागत्य अस्मच्छात्रान् आपस्तम्बश्रोतसूत्रानुसारं तथा बोधायनश्रोतसूत्रे अनुष्ठानभेदकथनपुरस्सरं च उद्बोध्य समग्रे अग्न्याधानविषये स्थूलपरिचयमकार्षीत् ।




## त्रयोदशं चतुर्दशं च सत्रम् ।






(दिनाङ्कः - ०९-११-२०२३) बृहस्पतिवासरे माध्याह्निकं सत्रं यदुपान्तिमं च सत्रं तत् अत्यन्तं वैशिष्ट्येन परिकल्पितम् आसीत् । यतः प्रथमदिनादारभ्य पञ्चमदिनपर्यन्तं विविधशाखाविद्वांसः यद्यत् पाठितवन्तः तस्य सर्वस्य प्रत्यक्षप्रयोगदर्शनाभावे अभीष्टं कार्यशाला प्रयोजनं न सम्भवतीति शुष्केष्टिप्रयोगः प्रदर्शितः । तत्रापि प्रथमसत्रे आधानं द्वितीयसत्रे अग्निहोत्रमिति क्रमेण प्रयोगदर्शनसत्रं प्रादर्शि । तत्र प्रयोगप्रदर्शने अग्निहोत्री नरसिंहभट्टवर्यः, वेदमूर्तयः सतीशभट्ट-चिन्मयभट्ट-प्रजितहेगडेवर्याश्च समुपस्थिताः आसन् । एतादृशप्रत्यक्षप्रयोगदर्शनेन कार्यशालाभागग्राहिणः नितान्तं लाभान्विताः अभूवन् ।

# समापनसत्रम्




श्रीराजीवगान्धीपरिसरस्य सङ्गोष्ठीप्रकोष्ठे वास्तुज्योतिषविद्याशाखायाः वेदाङ्ग-वेदभाष्यविद्याशाखायाश्च सप्तदिनव्यापिन्याः कार्यशालायाः समापनसत्रमपि शोभकृत्- आश्विन-कृष्ण-द्वादश्यां (१०-११-२०२३) तमे दिने सायं ०४.०० वादनसमये तन्त्रेणैव समायोजि । तत्र उभयोः कार्यशालयोः समापनसत्रे अग्निहोत्रिणः नरसिंहभट्टाः, स्थपतयः सुब्रह्मण्यवर्याश्च समामन्त्रिताः । तत्र सुब्रह्मण्यवर्याः देवालयवास्तुविषये सुबोधजनकं भाषणं विधाय देवालयवास्तुविशेषज्ञाः नष्टप्रायाः तेषां विषये व्यवधानं प्रोत्साहनञ्च देयमिति उदबोधयन् । अग्निहोत्रिणः नरसिंहभट्टाः बोधायनश्रौतसूत्राध्ययनविषये, प्रकृतकाले अग्निहोत्रिणां समस्याविषये च मनोगतम् अप्राकटयन् । तदनु सभायाः अध्यक्षाः परिसरनिदेशकाः प्रो.सि.एस्.एस्.नरसिंहमूर्तिवर्याः समुपस्थाय कार्यशालायाः समापनसत्रे आध्यक्षभणित्या उद्बोधनञ्च विदधुः ।



# दृष्टिः, प्रयोजनञ्च ।

## दृष्टिः

- अनेन कार्यक्रमेण लुप्तप्रायाणां श्रौतकर्मणां विषये सर्वेऽपि अनायासेन ज्ञानं प्राप्स्यन्ति ।
- आधान-अग्निहोत्रविषयिणी विविदिषा वर्धत इति विश्वासः ।
- शाखाभेदेन प्रयोगभेदसङ्ग्रहः ।
- समग्रस्य आधानस्य अग्निहोत्रस्य च चिन्तनम् ।
- श्रौतप्रयोगेषु वैज्ञानिकी दृष्टिः ।




## प्रयोजनम्

- आधानाग्निहोत्रयोः प्रयोगसङ्ग्रहः ।
- लुप्यमानस्य श्रौतप्रचारस्य परिरक्षणम् ।
- श्रौतकर्मणां सामग्रीसङ्कलनम् ।
- प्रात्यक्षिकदर्शनेन यज्ञप्रक्रियाज्ञानम् ।
- विभिन्नशाखीयश्रौतसूत्राध्ययनम् ।

# प्रतिभागिनां विवरणम् ।


परिसरीयवेदाङ्ग-वेदभाष्यविद्याशाखया समायोजितायां सप्तदिनव्यापिन्यां राष्ट्रियकार्यशालायां अत्यन्तं सोत्साहं नानाप्रदेशेभ्यः विद्यार्थिनः, शोधच्छात्राः, प्राध्यापकाश्च भागमग्रहीषुः । तत्रापि अन्तर्जालमाध्यमेन साक्षाच्च भागग्रहणाय व्यवस्था कार्यशालासमितिपक्षतः परिकल्पिता । सम्भूय ६५(पञ्चषष्टिः) प्रतिभागिनः कार्यशालायां पञ्जीकरणेन कार्यशालायाः साफल्यमवाप्नुवन् । तेषां च प्रतिशतपट्टिका इत्थं संगृहीता -

**अन्तर्जालमाध्यमेन / प्रत्यक्षमाध्यमेन प्रतिभागिनां प्रतिशतसङ्ख्यापट्टिका -**




माध्यमेन

**प्रतिभागिनां स्थानानुसारेण विभागे प्रतिशतसङ्ख्यापट्टिका -**



# व्ययीकृतो धनराशिः

| अ.क्र | विषयः | धनराशिः |
|---|---|---|
| ०१ | प्रदत्तो धनराशिः | 2,50,000/- |
| ०२ | व्ययीकृतो धनराशिः | 2,24,551/- |
| ०३ | प्रत्यर्पितो धनराशिः | 25,449/- |
| ०४ | पञ्जीकरणात् सङ्गृहीतो धनराशिः (Credited to The campus Director Account) | 15,600/- |

***Expendicture Copy***

| Central Sanskrit University | |
|---|---|
| Shri Rajiv Gandhi Campus Sringeri | |
| Workshop Expendicture paid bill details | |
| Sl.No | Bill amount |
| 1 | 12400 |
| 2 | 1000 |
| 3 | 528 |
| 4 | 140 |
| 5 | 150 |
| 6 | 840 |
| 7 | 80 |
| 8 | 353 |
| 9 | 5965 |
| 10 | 350 |
| 11 | 350 |
| 12 | 161 |
| 13 | 15050 |
| 14 | 350 |
| 15 | 2260 |
| 16 | 1450 |
| 17 | 1480 |
| 18 | 190 |
| 19 | 104 |
| 20 | 708 |
| 21 | 180 |
| 22 | 5320 |
| 23 | 630 |
| 24 | 4349 |
| 25 | 500 |
| 26 | 500 |
| 27 | 500 |
| 28 | 500 |
| 29 | 900 |
| 30 | 18500 |
| Total | 75788 |

| Central Sanskrit university | |
|---|---|
| Shri Rajiv Gandhi campus | |
| Workshop Expendicture Payable bill details. These bills may be pay to vendors. | |
| 1 | 21770 |
| 2 | 3295 |
| 3 | 16800 |
| 4 | 3000 |
| 5 | 1900 |
| 6 | 5000 |
| 7 | 10000 |
| 8 | 3143 |
| 9 | 4000 |
| 10 | 10000 |
| 11 | 2655 |
| 12 | 4000 |
| 13 | 3000 |
| 14 | 3000 |
| 15 | 3000 |
| 16 | 6000 |
| 17 | 4000 |
| 18 | 39200 |
| 19 | 5000 |
| Total | 1,48,763 |



# धन्यवादाः

